# मम पुस्तकम्

नाम – ______________________

पत्रसङ्केतः – ______________________

______________________

चल-दूरवाणी-सङ्ख्या – ______________________


शासकीय-चिकित्सा-केन्द्रम्
मुरारि-जनपदः
विनोद-पादुका-आपणः
रीता-सौन्दर्यम्
शुभः
लाभः
४

## वार्तालापाय

१. एतत् चित्रम् कुत्रत्यम् अस्ति ? २. जनाः किं किं कुर्वन्ति ? ३. भवतः/भवत्याः खाद्यान्नस्य आपणे किं किं प्राप्यते ? ४. अस्मिन् चित्रे कति बालाः सन्ति ? ५. अस्मिन् चित्रे (४) इति संख्या कुत्र लिखिता अस्ति ? ६. चित्रे कति खट्वाः सन्ति? ७. अस्मिन् चित्रे बालाः किं किं कुर्वन्ति ? ८. अस्मिन् चित्रे कति बालाः पठन्ति ?



# १ परिवारः प्रतिवेशः च

**वयं ज्ञास्यामः**

| अ | आ | न | प | स | र | व |
|---|---|---|---|---|---|---|

- १ तः ९ पर्यन्तं सङ्ख्या-परिचयम् ।
- पठनं लेखनं च ।

## ▪ वयं चित्रं दृष्ट्वा पठामः -




आपणः



परिवारः



जनाः



वीथिः



पाकशाला



द्वारम्



निवासः



प्रतिवेशी



अधिवक्ता

**शिक्षक-निर्देशः** — सहभागिनः क्रमशः सर्वेषां चित्राणां परिचयं कारयन्तु । चित्राणाम् अधः तत्सम्बद्धाः शब्दाः प्रदत्ताः सन्ति, चित्रं दृष्ट्वा शब्दानाम् उच्चैः उच्चारणं कारयन्तु । सहभागिनः उच्चैः उच्चारणं कर्तुं प्रेरयन्तु । चित्राणाम् अधः लिखितानां शब्दानाम् उपरि अङ्गुलीं संस्थाप्य पाठयन्तु ।

## ▪ वयं चित्रं दृष्ट्वा पठामः -

भवतः/भवत्याः गृहे किं किम् अस्ति ? (✓) चिह्नं योजयतु -



चुल्लिः



आसन्दः




दिनदर्शिका



सोपानम्



दीपः



नलिका

## पठन्तु लिखन्तु च -

अ



अग्निः



अश्वः

अ अ

आ



आपणः



आम्रम्

आ आ

**शिक्षक-निर्देशः** — सहभागिनः क्रमशः सर्वेषां चित्राणां परिचयं कारयन्तु। चित्राणाम् अधः लिखितानां शब्दानाम् अधः अङ्गुलीं संस्थाप्य उच्चारणं लेखनं च कारयन्तु। 'अ' एवञ्च 'आ' इत्यनयोः ध्वनेः आकृतेः च भेदम् अपि बोधयन्तु। इत्थमेव अन्येषाम् अपि अक्षराणाम् उच्चारणं लेखनं च कारयन्तु।

न



नदी



नखः

न न

ना



नारिकेलम्



नासिका

ना ना

प



पत्रवाहकः



पत्रम्

प प

पा



पात्रम्



पाचकः

पा पा

## स



सर्पः




सप्त

स स

## सा



साधुः



सागरः

सा सा

र



रज्जुः



रसगोलकम्

र र

रा



रात्रिः



राष्ट्रध्वजः

रा रा

व



वनम्



वस्त्राणि

व व

वा



वाद्ययन्त्रम्



वातायनम्

वा वा

## मम शब्दाः

**शिक्षक-निर्देशः**— 'परिवारः प्रतिवेशः च' इत्यस्मिन् विषये चर्चां कुर्वन्तु। सहभागिभिः सह तान् परितः विद्यमानानां जनानां संस्कृतेः सामाजिक-सम्बन्धानां च विषये चर्चां कुर्वन्तु। परस्परं चर्चां कृत्वा अस्मिन् विषये ३-४ शब्दान् लेखितुं कथयन्तु। एते शब्दाः तेषां भाषायाः अपि भवितुं शक्नुवन्ति, यथा – नमस्ते, सुप्रभात, भोजन, जल, पिता, माता, शिक्षक, परिवार इत्यादयः।

# रमाया: परिवार:



**मेघाः मेघाः वर्षन्तु । कृषकाः सर्वे नृत्यन्तु ।**
**क्षेत्रं सम्यक् कर्षन्तु । मेघाः मेघाः वर्षन्तु ।**

## भवान्/भवती किं विचारयति ?

| | | | |
|---|---|---|---|
| प्रश्नः | किम् अस्मिन् चित्रे धान्यस्य रोपणं प्रचलति ? | आम् ✓ | न |
| प्रश्नः | किं भवतः/भवत्याः ग्रामे कृषिः भवति ? | आम् | न |
| प्रश्नः | किं भवतः/भवत्याः परिवार-सदस्याः सहैव कार्यं कुर्वन्ति ? | आम् | न |
| प्रश्नः | किं भवान्/भवती अपि तस्मिन् कार्ये सहयोगं करोति ? | आम् | न |
| प्रश्नः | किम् अस्मिन् चित्रे वृक्षः अस्ति ? | आम् | न |

**शिक्षक-निर्देशः** — एतेषां प्रश्नानां माध्यमेन सहभागिनां कार्यस्य परिवारस्य च विषये चर्चां कुर्वन्तु । उपरि प्रदत्तानां प्रश्नानाम् अधः अङ्गुलीं संस्थाप्य पठन्तु तथा 'आम्' अथवा 'न' इत्यनयोः (✓) चिह्नं योजयितुं कथयन्तु ।

## पश्यामः, पठामः लिखामः च -

'अ' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

अग्निः नदी वायुः आकाशः

'आ' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

रज्जुः नासिका आम्रम् मार्जनी

'व' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

पाचकः द्वारम् परिवारः वनम्

'वा' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

मार्गः सप्त आसन्दः वातायनम्

'न' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

आपणः गृहम् नदी पत्रवाहकः

'ना' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

वाद्ययन्त्रम् वृक्षः नखः नारिकेलम्

'र' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

नलिका रसः जनः पाकशाला

'स' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

समुद्रः आचार्यः दूरवाणी पात्रम्

'प' इति वर्णेन आरब्धं शब्दं चित्वा लिखन्तु –

चषकः पर्णम् पुस्तकम् लेखनी

**शिक्षक-निर्देशः** — सहभागिनां कृते पठनस्य लेखनस्य च अवसरं प्रयच्छन्तु तथा शब्दानां लेखने तेषां सहयोगं कुर्वन्तु। प्रदत्त-अक्षरेभ्यः ये शब्दाः आरब्धाः भवन्ति, तादृशानां शब्दानां परिचयं कारयित्वा लेखनस्य अभ्यासं कारयन्तु।

## गणनां कृत्वा संख्यायाः परिचयं कुर्वन्तु -



१

**एकं** पुष्पम्



२

**द्वे** पुस्तके



३

**त्रीणि** कन्दुकानि



४

**चत्वारि** आम्राणि



५

**पञ्च** गृहाणि



६

**षड्** आसन्दाः



७

**सप्त** घटाः



८

**अष्ट** नलिकाः



९

**नव** दाडिमानि

**शिक्षक-निर्देशः** — प्रयत्नः कर्तव्यः यत् सहभागिनः चित्रेषु प्रदर्शितानां वस्तूनां गणनां कृत्वा प्रदर्शितानां संख्यानां परिचयं प्राप्नुयुः। सहभागिनां कृते तेषां समीपस्थानां वस्तूनां गणनां कर्तुम् अवसरं प्रयच्छन्तु, यथा- प्रकोष्ठे कति जनाः सन्ति ?

## ▪ प्रदत्तानां संख्यानाम् आधारेण गोलाकारं कुर्वन्तु -

४ **चत्वारि** आम्राणि



७ **सप्त** नलिकाः



**शिक्षक-निर्देशः** — सहभागिनां प्रोत्साहनं कुर्वन्तु यत् ते संख्यानां परिचयं वदन्तु तथा च संख्यायाः अनुसारं वस्तूनां गणनां कृत्वा गोलाकारं कुर्वन्तु।

## ■ वस्तूनां संख्यानां च मेलनं कुर्वन्तु -

१ एकम्

२ द्वे

३ त्रीणि

४ चत्वारि

५ पञ्च



६ षड्

७ सप्त

८ अष्ट

९ नव

**शिक्षक-निर्देशः** — प्रयत्नं कुर्वन्तु यत् सहभागिनः प्रत्येकं समूहे प्रदर्शितानां वस्तूनां गणनां कृत्वा संख्यया सह मेलनं कुर्वन्तु।

## ▪ चलदूरवाण्यां का संख्या अस्ति ?




## ▪ स्वस्य स्व-परिचितस्य जनस्य वा चलदूरवाणी-संख्यां लिखतु –

## ▪ अस्यां चलदूरवाणी-संख्यायां कस्याः संख्यायाः एकाधिकवारं नोदनं करिष्यामः – ____________________

## ▪ संख्यां वदामः लिखामः च –

| | | | | | |
|---|---|---|---|---|---|
| १ | १ | | ६ | ६ | |
| २ | २ | | ७ | ७ | |
| ३ | ३ | | ८ | ८ | |
| ४ | ४ | | ९ | ९ | |
| ५ | ५ | | ० | ० | |

**शिक्षक-निर्देशः**— दूरवाण्यां प्रदत्तानाम् अङ्कानां लेखनस्य अभ्यासं कारयन्तु। प्रयत्नं कुर्वन्तु यत् सहभागिनः आदौ एतेषाम् अङ्कानां लेखनं बिन्दुयुक्तानां रेखाणां सहयोगेन कुर्युः अनन्तरं स्वयमेव लिखेयुः वदेयुः च। येषां सहभागिनां कृते अभ्यासस्य अधिका आवश्यकता अस्ति, तेभ्यः पुनः पुनः अभ्यासस्य अवसरः दातव्यः। अयमपि यत्नः करणीयः यत् सहभागिनः दूरवाण्यां टङ्कितान् अङ्कान् ज्ञात्वा पुनः १ तः ९ पर्यन्तं संख्याः लिखन्तु।

## गोविन्दः सपरिवारं शकटेन गच्छति । पश्यन्तु गणयन्तु लिखन्तु च –



| | |
|---|---|
| शकटे कति जनाः सन्ति ? | |
| शकटे कति पुरुषाः सन्ति ? | |
| शकटे कति महिलाः सन्ति ? | |
| चित्रे कति पुष्पाणि सन्ति ? | |
| शकटे कति चक्राणि सन्ति ? | |
| शकटे कति तैलदीपाः सन्ति ? | |

**शिक्षक-निर्देशः** — सहभागिभिः वस्तूनां गणनां कारयित्वा संख्या-लेखनस्य अभ्यासं कारयन्तु। संख्यायाः पठने लेखने च सहभागिनां सहयोगं कुर्वन्तु। यदि भवन्तः इच्छन्ति तर्हि पार्श्वे विद्यमानानां वस्तूनां गणनाम् अपि कारयितुं शक्नुवन्ति।

# वर्णगीतम्

पठाम वर्णान् आगच्छ
आगच्छ सखे आगच्छ ॥

‘अ’ अवन्तिके! ‘आ’ आशे!
‘इ’ इन्द्राणि! ‘ई’ ईशे!

अ आ इ ई गायामः!
आगच्छ सखि! आगच्छ !

‘उ’ उमाकान्त! ‘ऊ’र्जस्विन्!
‘ऋ’ ऋतुपर्ण तेजस्विन्!

उ ऊ ऋॠलृ गायामः!
आगच्छ सखे! आगच्छ!

‘ए’ एकलव्य ! ‘ऐ’श्वर्ये!
‘ओ’ ओङ्कार ! ‘औ’ और्वि!

ए ऐ ओ औ गायाम !
आगच्छ सखे! आगच्छ !

‘अं अः’ इति पठामः
अम्बुजनाभं स्मरामः

पठाम स्वरान् आगच्छ!
आगच्छ सखे ! आगच्छ!



■ **वर्णगीतात् अधः प्रदत्तेभ्यः वर्णेभ्यः प्रारब्धानि नामानि चित्वा लिखामः -**

ऋ ................ उ ...................

इ ................. ए ...................

■ **चित्रं दृष्ट्वा रिक्तस्थाने उचितं वर्णं पूरयामः -**

१. सा......सः 

२. वान.... 

३. ...रिकेलम् 

४. व.....म् 

५. ......म्रम् 

६. ....लिका 

**शिक्षक-निर्देशः** — सहभागिभिः सह मिलित्वा गीते विद्यमानानाम् अक्षराणां शब्दानां च परिचयं कारयन्तु। अक्षराणां शब्दानां च लेखने सहभागिनां सहयोगं कुर्वन्तु। मिलित्वा गीतं गायन्तु।